इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्क :- 02.02.2026 प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् केन्द्रीय-आयव्यय संकल्पनापत्रं मानवकेन्द्रितम् अस्ति तथा च नूतनैः परिष्कारैः भारतस्य आधारं सुदृढं करोति इति। प्रधानमन्त्री एतत् ऐतिहासिकम् अपि च देशस्य परिष्कार-मार्गस्य दीर्घकालिक वृद्धेः च प्रेरकम् इत्यपि वर्णितवान्। आयव्यय-संकल्पना-पत्रस्य प्रस्तुतीकरणस्य अनन्तरम् एकस्मिन् वक्तव्ये श्रीमोदीः अवदत् यत् एते प्रस्तावाः अर्थव्यवस्थां ऊर्जां प्रदाष्यन्ति, नागरिकान् सशक्तं करिष्यन्ति तथा च भारतस्य युवभ्यः नूतनम् औन्नत्यं प्राप्तुं नूतनम् अवसरान् प्रददाति। सर्वकारस्य परिष्कार-कार्यसूचीं "रिफार्म् एक्स्प्रेस्" इति सम्बोधयन् प्रधानमन्त्री अवदत् यत्, अद्य भारतं यस्मिन् परिष्कार-याने अस्ति तस्मै अनेन आय-व्यय-संकल्पनया नूतनां ऊर्जां, नूतनां गतिं च मिलिष्यति।

[(शून्य)-0605-पी. एम. 2047 विकसित भारत आधार-]

-------

वित्तमन्त्री

वित्तमन्त्री निर्मला सीतारामनः षड्विंशत्यधिक द्विसहस्र-सप्तविंशत्यधिक द्विसहस्रतम वर्षयोः केन्द्रीय-आयव्यय-संकल्पना पत्रम् उपस्थापितवती, यस्मिन् विनिर्माणस्य, अवसंरचनायाः, वृत्यावसरस्य च कृते प्रबलं प्रोत्साहनं प्रदत्तम् अस्ति, तथा च सरल-करस्य, सीमाशुल्कस्य च व्यवस्थायाः प्रस्तावः वर्णितः अस्ति। संसदि निरन्तरं नवमं बारं आय-व्यय-संकल्पना पत्रस्य प्रस्तावे, श्रीमती सीतारामनः

वैश्विक-अनिश्चिततायां विकासं स्थिरीकर्तुं बहु-पक्षीय-कार्यनीतिं निरूपितवती, यस्मिन् देशीय-इलेक्ट्रानिक्स् तथा सेमिकण्डक्टर्-क्षमतानां विस्तारः, आधारभूत-संरचना-परियोजनायाः सङ्कट-निवारणं, भारतस्य युवभ्यः उदयोन्मुख-प्रौद्योगिकीनां कृते कौशलं प्रदातुं, करदातृणां आयातकानां च अनुपालनं सुकरं कर्तुं च अन्तर्भवन्ति। एकः प्रमुखः संरचनात्मकः परिष्कारः आय-कर-अधिनियमेन विंशति पञ्चविंशति इत्यनेन सह आगच्छति, यत् अस्य वर्षस्य अप्रैल एक दिनांकात् प्रभावी भविष्यतीति, यस्मिन् सरलतायाः नियमाः, पुनः परिकल्पिताः प्रपत्राः च सन्ति।

--------

राष्ट्रपतिः

राष्ट्रपतिः द्रौपदी मुर्मू अद्य आरभ्य ओडिशा-छत्तीसगढ-राज्ययोः षड्दिवसीय यात्रायां भविष्यति। भ्रमणावधौ राष्ट्रपतिः बालासोरनगरे फ़कीर-मोहन्-विश्वविद्यालयस्य दीक्षान्तसमारोहे भागं गृहय तस्य नवनिर्मितस्य प्रेक्षागृहस्य उद्घाटनम् करिष्यति। बुधवासरे राष्ट्रपतिः भञ्जबीर् सुनाराम् सोरेन् वर्यस्य प्रतिमायाः अनावरणं करिष्यति तथा च रायरङ्गपुरस्य माहुलडीहा-नगरस्य सर्वकारीय-बालिका-उच्चमाध्यमिकविद्यालये छात्रैः सह संवादं करिष्यति। सा सर्वकारीय-आयुर्वेद-चिकित्सकीय-महाविद्यालयस्य तथा चिकित्सालयस्य, ओ. यू. ए. टी. परिसरस्य, शर-संधान-केन्द्रस्य, नगर-सौदर्यिकरणादीनां विविध-परियोजनानां उद्घाटनं शिलान्यासं च करिष्यति। राष्ट्रपतिः अस्य मासस्य षष्ठे दिनाङ्के सिम्लीपाल-नगरे आदिवासि-समुदायानां महिलाभिः, युवभिः च सह संवादं करिष्यति। सा भुवनेश्वर-नगरे ग्लोबल्-फाईनेन्स्-एण्ड्-टेक्नालजि-नेट्वर्क् इत्यस्य सहयोगेन ओडिशा-सर्वकारेण आयोजिते 'बलैक-स्वान्-समिट्, इण्डिया' इत्यस्मिन् अपि भागं भजिष्यति। अस्मिन् मासे सप्तमे दिनाङ्के राष्ट्रपतिः छत्तीसगढस्य जगदलपुरे

षड्विंशत्यधिक द्विसहस्रतम वर्षस्य 'बस्तर-पण्डुम्' इति उत्सवस्य उद्घाटनं करिष्यति।

संसदः धन्यवादप्रस्तावः

अद्य राष्ट्रपतेः अभिभाषणस्य कृते संसदः उभयोः सदनयोः धन्यवादप्रस्तावः भविष्यति। केन्द्रीयमन्त्री तथा भाजपेति दलस्य सांसदः सर्बानन्द सोनोवालः लोकसभायां प्रस्तावम् उपस्थापयिष्यति, तस्य दलस्यैव सदस्य-सांसदः तेजस्वी सूर्यः च प्रस्तावम् अनुमोदयिष्यति। राज्यसभायां भाजपेति दलस्य सांसदः सी. सदानन्दन् मास्टर इत्येषः प्रस्तावं प्रवर्तयिष्यति, तस्य सह-सदस्या मेधा विश्राम कुलकर्णी च प्रस्तावम् अनुमोदयिष्यति।

एशियन् रायफ़ल् स्पर्धा

षड्विंशत्यधिक द्विसहस्रतम वर्षस्य एशियन् रायफ़ल् एण्ड् पिस्तौल शूटिङ्ग चाम्पियन्शिप स्पर्धा अद्य नवदिल्ल्याः डा. करणी सिंह शूटिङ्ग् रेञ्ज- इत्यत्र आरभ्यते।

।। इति वार्ताः।।